| CSM – 44 / 15 |
| --- |
| **Indian Language & Literature Sanskrit** |
| **Paper – I** |

*Time : 3 hours*

*Full Marks : 300*

*The figures in the right-hand margin indicate marks.*

*The questions must answered in Sanskrit using Devanagari Script.*

*Candidates should attempt Q. No. 1 from Section – A and Q. No. 5 from Section – B which are compulsory and* ***THREE*** *of the remaining questions, selecting at least* ***ONE*** *from each Section.*

## Section – A

1. काश्चन त्रीन् विभागान् उत्तरयत — 20×3 = 60

(क) अधोनिर्दिष्टाः संज्ञाः ससूत्रं सोदाहरणं निरूपणीयाः

(i) प्रातिपदिकम्

(ii) उपधा

(iii) सवर्णम्

(iv) इत्

Techofworld.In

(ख) अधोनिर्दिष्टेषु शब्देषु यथास्थानं ससूत्रं सन्धिं सन्धिविच्छेदं वा कुरुत :

Techofworld.In

(i) शिवेहि

(ii) पतञ्जलिः

(iii) उपैति

(iv) सन्नच्युतः

(v) पुनर् + रमते

(vi) अहन् + अहन्

(vii) सर्पः + सरति

(viii) उत्थानम्

(ix) षट्त्सन्तः

(x) नौ + य

(ग) अधोनिर्दिष्टानां पदानां विभक्तयः ससूत्रं प्रदर्शनीयाः

(i) रामेण वाणेन हतो वाली ।

(ii) अक्षान् दीव्यति ।

(iii) लोकाद् अधिको हरिः ।

(iv) गच्छतां धावन् शीघ्रः ।

(v) कृष्णेन सदृशो वीरो नास्ति ।

(घ) अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत :

(i) विष्णुः समुद्रम् अधिशेते ।

(ii) तिमयः जलं वितन्वन्ति ।

(iii) मया दिनानि अतिवाहितानि ।

(iv) अहम् अश्रु विसृष्टवान् ।

(v) नदी जलानि वहति ।

Techofworld.In

2. चम्पूकाव्यस्य लक्षणमुल्लिख्य नलचम्पूकाव्ये लक्षणसमन्वयं कुरुत । 60

3. संस्कृतदृश्यकाव्येषु भवभूतेरवदानं निरूपयत । 60

4. इन्दो-इउरोपीय-भाषावर्गस्य परिचयं प्रदत्त । 60

## Section – B

5. यथेच्छं त्रयः प्रश्नाः समाधेया : 20×3 = 60

(क) भारतीयसंस्कृतौ चातुर्वर्ण्यस्य परिचयमेकमुपस्थापयत ।

(ख) गृहस्थपालनीयानां संस्काराणां परिचयं प्रदत्त ।

(ग) संस्कृते आयुर्वेदविषयकानां ग्रन्थानां विवरणं दत्त ।

(घ) गूढपुरुषोत्पत्तेः तात्पर्यं विश्लेषयत ।

6. बौद्धदर्शनस्य परिचयमेकं प्रदत्त । 60

7. 'आधुनिकभारतवर्षस्य शिक्षाव्यवस्थां' इति शीर्षकमवलम्ब्य कश्चित् प्रबन्धः लेखनीयः (प्रायः त्रिशतशब्दैः) । 60

8. गद्यांशममुमाश्रित्य अधः प्रदत्ताः प्रश्नाः समाधेया : 60

गृहस्यैकस्य दिक्चतुष्टयमग्निना परिवेष्टितमभूत् । गृहस्थाः सर्वएव

प्राणभयेन पलायितवन्तः । ईदृशे काले शोकातुरा कापि रमणी विलपन्ती तज्ज्वलद्गृहम् प्रवेष्टुमुद्यता बभूव । तस्याः प्राणाधिका दुहिता तस्मिन् गृहे वर्त्तते इति न पलायनकाले स्मृतमभूत् । ये जलयन्त्रमुपादाय समाजग्मुः तेषामेकः साहसिकः पुरुषो जननीं सान्तयित्वा स्वयं तस्या दुहितरम् अग्निपूर्णगृहाद् बहिरानेतुं प्राद्रवत् । इतश्च जलयन्त्रादग्नेरुपरिष्टात् अविरलधारया जलानि विकीर्यमाणान्यासन् । साहसिकः पुरुषो गृहाभ्यन्तरं प्रविश्य समपश्यत् दिक्चतुष्टयं घनधूमसमाच्छन्नम् । स तत्र कमपि जनं नापश्यत् । किन्तु बालिकामग्निमध्ये विमुच्य स्वयमेव वा कथं शोकातुरां जननीं मुखं दर्शयिष्यते । अतः सोऽन्धकारे बालिकां हस्तेनान्वेष्टुमारभत । बहिर्जना दृष्टार्तिविलम्बास्तस्य मृत्युं निश्चितवन्तः । इतस्तु गृहमध्ये वह्निः प्राज्वलत् । तदालोकेन वीरपुरुषः सुषुप्तां बालिकां चक्षुषा समुपलभ्य क्रोडे सन्निवेश्य सोर्द्ध्वश्वासं गृहाद् बहिर्बभूव । समन्ततश्चानन्दकोलाहलः समुदचरत् ।

(क) रमणी कथं कुत्र प्रवेष्टुमुद्यता ?

(ख) कः कामानेतुं कुत्र प्रविष्टः ?

(ग) कथं पुरुषः कमपि नापश्यत् ?

(घ) गृहमध्ये पुरुषः किमकरोत् ?

(ङ) पुरुषः केन उपायेन बालिकामुद्धारयामास ?

(च) कथमानन्दकोलाहलः सञ्जातः ?

Techofworld.In